देहसदितित्यक्त्वा निःसंगो विचरेत् आयतनवत्प्रमाणानि प्रत्यक्षेणानुमानादि अनुमानसावयवेन दृश्यपृथिव्या
दिनिगमेन प्रत्यक्षमाकाशादि आत्मसंविदा स्वानुभवेन सर्वं दृश्यमायतनवदसच्चेति ज्ञात्वेति ननु य
घात्मसंविदा सदित्युच्यते न ह्यात्मा स्वप्रकाशो देहादिद्वैतं च जडमित्युक्तं स्यात् ननु यथा च सति संसारः।

तस्माद्व्याप्यात्मनोऽन्यस्माद् व्योमभावो निरूपितः निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ७ इदं
गुणमयं विहितं त्रिविधं मायया कृतं एतद्धित्वात्मउत्थितज्ञानविज्ञाननैपुण्ये ८ न निंदति न च।
स्तौति लोके चरति सूर्यवत् प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ९ उद्धव उवाच नैवात्म।
नो न देहस्य संसृतिर्दृष्टदृश्ययोः अनात्मस्वदृशोरीशकस्य स्यादुपलभ्यते १० आत्माव्ययोऽगुणः शु
प्रतिभासो न तु देहेनेति चोदयति ११ नैवेति द्धः स्वयंज्योतिरनावृतः अग्निवद्दारुवदचिद्देहः।
अनात्मसदृशोर्जडाजडयोः अतदेहेन्तुः दृष्टदृश्ययोः माभूत्तद्वयोरपि तत्राह उपलभ्यत इति एतत्प्रपञ्चय
ति आत्मेति १० अव्ययत्वादिपि च विशेषणैः नाशादिरोगादिगुणपाप्मपुण्यज्ञानपरिच्छेदानामसंभवं दर्शय
ति देहेनदेहेनमं तत्पय्यह अविनजडः अयं भावः यथाग्निर्दारुणो भेदेनानुपलभ्यते दारुप्रकाशएव।
अग्निः स्वप्रकाशकः तथा देहात्मनोरपीति नसंसृतिलेयोरन्यतरस्यापि चरत्वं तस्य सत्त्वं तथापि उभयोरेव

आयतनवद्देहस्तात्वा निःसंगो विचरेदिह

यावदिति सान्निकर्षणं संबंधः तन्वसंसारस्य कुतः संबंधमात्रत्वात्तत्राह अविविकिनः स्वतन्त्रकुतस्त्यार्थः नन्वस्व
भा.ए. प्रकाशस्य कथमज्ञानतः संसारस्तत्राह अविविकिनः अपार्थोऽपि केवलफलवान्फलस्फूर्तिः ननु तत्त्वतो
टी. नीत्यर्थः ११ तत्त्वमनोदेहादेः कुतः संसारस्फूर्तिहेतुत्वमपि तत्राह अर्थे हीति अस्यात्मनः १२ ननु कथं
१३५ विज्ञानेनाविषयस्फूर्तिः जीवस्तु कस्यापि तु निर्वाणो नित्यनिर्मोक्षप्रसङ्गः स्यात्तत्राह यथाहीति प्रस्वापः।
135 स्वप्नः बहूनर्थान्बिभर्ति पुष्णातीति तथा १३ अहंकारस्य लक्षणं देहादिसन्निकर्षपर्वसंसारत्वं लवन

श्रीभगवानुवाच यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणं संसारः फलवांस्तावदपार्थोऽप्यविवेकि
नः ११ अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा १२ यथा
ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते १३ शोकहर्षभय
क्रोधलोभमोहस्पृहादयः अहंकारस्य दृश्यन्ते जन्ममृत्युश्च नात्मनः १४ देहेन्द्रियप्राणमनोऽभिमा
नो जीवान्तरात्मा गुणकर्ममूर्तिः ॥

मन्वयव्यतिरेकाभ्यां दर्शयति सुषुप्तादौ तेषामदर्शनान्न अ
हंस्फूर्तौ निविद्धेनत्व सर्वेति प्रतीत्यभावान्न हंस्यत्वाच्च सत्वादीनां कृपालुत्वादिवद्धर्मत्वानुपपत्ते
रितिभावः १४ ननु यद्यहंकारस्य संसारस्तर्हि मुक्तिरपि तस्यैवेति मुक्तावहंकाराविशेषः प्रसङ्गेनेत १३५
त्राह देहेति देहादिष्वभिमानो यस्य सः आत्मैव तेषां मन्तर्हितो जीवः अतएव गुणकर्ममयी यस्य सः

135A

मण्वस्तस्योपाधिभिर्वद्धेषेवस्वरूपादिभोद्गतिः संसारोपरसेस्माधीनः सर्वतोधावति अतोनायंदोषइतिभा।

वः तदेवमेद्दकारहृते वथमुपपाद्येदानीज्ञानेननन्दिद्रूनोमुक्तिरित्याह अमूलमिति वस्तुतोमूलशून्यः

अज्ञानमतस्तुवक्रभिःदूपैः द्रुपितंप्रकाशितमैद्रजालिकतुल्यमितिवाकिंतेनतदाह मनइति मनआदी

नांदृढः यद्वामनआदिषुक्लिप्यते यत्कर्मग्रहेकाणांगोपासनयानिशितेनज्ञानावंद्वेनछित्वातेदेवस्ता

नेस्वरूपसाधनफलैर्निरूपयति ज्ञानमिति १५ विवेकोज्ञानेनतत्साधनान्याह निगमोवेदःतपः।

सत्वंमहानिन्नुरूपेवगीतः संसारस्याधावतिकर्मतंत्रः १६ अमूलमेतद्वहुरूपरूपैर्मनोव। ने

वः प्राणशरीरकर्म ज्ञानासिनोपासनयाशितेनछित्वामुनिर्गांविचोदत्रुसः १७ ज्ञानंवि

वेकोनिगमस्तपश्चप्रत्यक्षमैतिह्यमथानुमाने आद्यंतयोरस्ययदेवकेवलंकालश्चहेतुश्च

देवमध्ये १८

स्तधर्मः प्रत्यक्षस्वानुभवःपेतिह्यमथश्चानुमानंतनकः फलंज्ञानस्वरूपमाह आ

धंतस्योपरस्यजगतः मध्येपितदेवकेवलंनतुजगति किंतत्कालःकलयतिप्रकाशयतियःतथा

हेतुःकारणंचयत् तदेवयत्तदुक्तंभवति यदस्यविश्वस्यकारणंप्रकाशकसत्वस्यतदात्मकमेवतत

नततःइत्यत्रिंत्येवंनिश्चयफलोनिगमादिज्ञायते योविवेकस्तत् ज्ञानमिति २० तत्रनानाभेदस्याव

हारानेवंतस्यापिविश्वस्यकारणात्मकसदृशंतमाह १९ ॥ ॥०

पश्चेति

भा.पु. सकलेन स्वकृतं कुण्डलादिरूपेण विरचितं यद्धिरण्यं सर्वस्य हिरण्मयस्य कुण्डलादेरुत्पत्तेः पुरस्तात्तन्नाशाच्च प
टी. श्चाद्यदस्ति कटककुण्डलमित्यादिना नाना व्यपदेशैः व्यवहारस्य मध्यमागमपि तदेव यथा तद्वदस्य विश्वस्य
कारणभूतोऽहमेव नानाव्यवहारलक्षणः नन्वस्मत्तः पृथगिव भासमिति ।१९। तदेव कार्यस्य कारणात्मकत्वा
१२६ त्मकतामुक्त्वा प्रकाशस्य प्रकाशात्मकतामाह विज्ञानमिति त्रियवस्थस्य प्रकारस्य पृथक्रूपाकः स्फुटे
तुरीयेन जाग्रदादित्रिवस्थयाद्विज्ञानमतः तदवस्था कारणभूतं च यद्गुणत्रयं यच्च कारणकार्यकर्तृ

यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य तदेव मध्ये व्यवहार्यमाणं नाना।
पदेशैरहमस्य तद्वत् ।१९। विज्ञानमेतत्त्रियवस्थमङ्ग गुणत्रयं कारणकार्यकर्तृ सम
न्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यम् २०॥

कारणमध्यात्मं कार्यमधिभूतं कर्तृ अधिदैवं एवं गुणत्रयकार्यभूतं त्रिविधं ज्ञानं येन तुर्ये।
ण सामान्यज्ञानमात्रेण समन्वयेन भवति येनानुगतप्रकाशान्तरं न पृथ्वः तमेव भान्तमनुभाति
सर्वं तस्य भासा सर्वमिदं विभातीति तथा च श्रुतिः चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो यन्मनो ये विदुरि।
त्यादिश्रुतेः ननु विशेषविज्ञानव्यतिरेकेण न तुर्यं नामोपलभामहे तत्राह व्यतिरेकतश्च सुषु। १२६
प्त्यादौ यदस्ति तदेव सत्यमिति २०॥ ॥

136

136A

एवं कालत्रयेप्यव्यभिचारिणः सत्यत्वमुक्तं व्यभिचारिणस्त्वसत्यत्वमाह नयदिति मध्ये च तन्नस्थमास्ति किं
तु व्यपदेशमात्रं कुतः यतः यद्यद्व्यतिरेकेणान्येन भूतेन जातेन प्रसिद्धं प्रकाशितं च तत्तदेव कारणप्रकाशकत्वा यत्
त्तन्मात्रं स्यान्नत्वन्यदिति मे मनीषा बुद्धिः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्र
ह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेण च कार्यस्य प्रकाश्यस्यानुपलंभादिति भावः २१ एवं सामा
न्यतः कार्यप्रकाश्ययोः कारणप्रकाशकाभ्याम् अभेदमुक्त्वा प्रसंगेन तदुभयविवेकपूर्वकं प्रपंचस्य ब्रह्माभेद

न यत्पुरस्तादुत यन्न पश्चान्मध्ये च तन्न व्यपदेशमात्रं भूतं प्रसिद्धं च परेण यद्यत्
तदेव तत्स्यादिति मे मनीषा २१ अविद्यमानोप्यवभासते यो वैकारिको राजस ष [illegible]
एष सर्गः ब्रह्म स्वयंज्योतिरतो विभाति ब्रह्मेंद्रियार्थात्मविकारचित्रं २२

माह अविद्यमान इति योयं वैकारिकः विकारसमूहः स एष अविद्यमानोपि राजसः सर्गः रजोद्वारेण
ब्रह्मकार्यभूत इत्यर्थः अवभासतेपि ब्रह्मप्रकाश्यमेवेत्यर्थः ब्रह्म तु स्वयं स्वतः सिद्धं न तु कार्यमित्यर्थः
ज्योतिः स्वप्रकाशकमित्यर्थः अतः कारणादिंद्रियाणि चार्थाश्च आत्मा मनश्च देवानामप्युप
लक्षणं विकाराः पंचभूतानि एवं चित्रं ब्रह्मैव भातीति २२ ॥ ॥

भा॰पु॰ उपसंहरति एवमिति एवंनिगमतःप्रत्यक्षेतिह्यानुमानैःस्फुटंयथाभवतितथा ब्रह्मविवेकहेतुभिः तथा।
टी॰ परम्परेहादिरूपवादेश्चात्मत्वनिषेधेनच कीदृशेन विशारदेननिपुणेनगुरुणानिमित्तभूतेनेतिवा आत्म
१३७ विषयंसंदेहंछित्वा स्वानंदतुष्टःसन्नखिलेभ्यः कामुकेभ्यः इंद्रियेभ्यउपारमेत निःसंगोभवेत् २३ पराप
137 वादंप्रपंचयति वपुरात्मानभवतिपार्थिवत्वात् घटवत् तथाइंद्रियाणि तदधिष्ठातारोदेवाः असुर्म

एवंस्फुटंब्रह्मविवेकहेतुभिः परापवादेनविशारदेन छित्वात्मसंदेहमुपारमेत
स्वानंदतुष्टोखिलकामुकेभ्यः २३ नात्मावपुःपार्थिवमिंद्रियाणिदेवाह्यसुर्वा
युर्जलंहुताशः मनोन्नमात्रंधिषणाचसत्त्वमहंकृतिः खंक्षितिरर्थसाम्यं २४

न्तः धिषणाबुद्धिःसत्त्वंचित्तं अहंकृतिरित्येतेआत्मानभवंति कुतः अन्नमात्रंअन्नोपष्टंभकत्वात् वा
युः शरीरवत् वायुर्जलंच हुताशःतेजः खंक्षितिरिति पंचभूतानिअर्थाःशब्दादयः साम्यंप्रकृतिश्च
नात्माजडत्वात्घटवदिति यद्वा दृष्टांतेनानुमानानितानिसूचितानि तद्यथा इंद्रियाण्यात्मानभवंति
तैजसत्वात्प्रदीपवत् करणत्वात्मनोवत् प्राणश्चवायुत्वाद्बाह्यवायुवदिति २४ ॥ ० १३८

श्री

एवंविवेकज्ञानवतो मुमुक्षोर्नेंद्रियादिकृतो गुणदोषसंबंधः स्यादित्याह समाहितैरिति मत्स्वविविक्तधाम्नः म
मत्स्वरूपविविक्तं धाम स्वरूपं येन तस्य प्रकाशकस्य प्रकाश्यगुणदोषा न भवेतीति रविदृष्टांतेनोक्तं २५ अ
थ गुणेष्वेव नावस्थितस्य न केपि गुणदोषाः स्युरित्याकाशदृष्टांतेनाह यथेति वाय्वादीनां शोषणदाहन
क्लेदनरजोधूसरत्वादिभिर्गतागतैरागमापायिभिः ऋतुगुणैः शीतोष्णादिभिर्वा हन्यते अहंकारात्परम

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्स्वविविक्तधाम्नः विक्षिप्यमाणैरुत किं नु दूषणं वा
घनैरुपेतैर्विगतै रवेः किं २५ यथा नभो वाय्वनलाम्बुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते तथाक्ष
रं सत्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परं २६ तथापि संगः परिवर्जनीयो गुणेषु माया
रचितेषु तावत् मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनः कषायः २७ यथामयोसाधु चिकि
त्सितो नृणां पुनः पुनः संतुदति प्ररोहन् एवं मनोपक्वकषायकर्म कुयोगिनं विध्यति सर्वसंगं २८

त्वात् संसृतिहेतुभिर्न दूष्यते यद्वा अहंकारस्य संसृतिहेतुभिरिति २६ मुक्तवदसंगत्वानीत्यपेक्ष
माविचारेत्वात् हा प्रमा तथापीति गुणेषु विषयेषु रजः रागः मनसः कषाय इति दुर्निरासत्वमाह २७
एतदेव दृष्टांतेनोपपादयति यथेति नृणामामयो रोगः असाधु असम्यक् यथा भवति तथा पक्वकषाय
कर्मस्य दाराः कषायाः रागादयः तन्मूलानि कर्माणि च यस्मिंस्तत् अत एव सर्वसंगा सर्वेषु पुत्रादिषु स

त्मानं मनः कुयोगिमसमप्यकृतानि नं विषयनिम्नं यति २८

137A

मा.म. ननु कथं विद्विषयसंगेयदियोगाभ्रंशः स्यात् मुक्तत्वहिंसोपायेनुयोगमार्गमात्तत्राह कुयोगिनइति मत्र
टी. ध्यभूतैर्वं प्रशिष्यादिरूपैः त्रिदशैरुपसृष्टैः प्रेरितैः तथाचश्रुतिः यस्मात्तदेषां नप्रियं यदेतन्मनुष्या
१३८ विद्युरिति भूयो जन्मान्तरेणनतुकर्मतंत्रं कर्मविस्तारः २८ ननुविदुषामपिसर्वथाकर्मदृश्यादिदृश्यमिति
138 पुनः संसारः स्यादतआह करोतीति विदुषोन्योसौजन्तुर्देहएवभोजनादिकर्मकरोति क्रियतेवि

कुयोगिनो ये विहितान्तरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ते प्राक्तनाभ्यासबलेन भूयो यु
ञ्जन्ति योगं न तु कर्मतन्त्रम् २८ करोति कर्म क्रियते च जन्तुः केनाप्यसौ चोदित आनिपातात्
न तत्र विद्वान् प्रकृतौ स्थितोपि निवृत्ततृष्णः स्वसुखानुभूत्या २९ तिष्ठन्तमासीनमुत व्रजन्
तं शयानमुक्षन्तमदन्तमन्नं स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वेद ३०

क्रियतेच तेनकर्मणा पुष्याद्यपि प्राप्नोतीत्यर्थः केनापि संस्कारादिना चोदितः सन् विद्वांस्तु प्रकृतौ
देहेस्थितोपि तत्रकर्मणि न विक्रियते निरहंकारित्वात् हर्षविषादादिभिः संसारं न प्राप्नोति २९ किं
च आत्मानात्मविवेकेन कर्मविकारशंकायतो देहमप्यसौ न पश्यतीत्याह तिष्ठन्तमिति उक्तं तेन स्वरूप १३८
ते स्वभावमात्रमन्यदपि दर्शनादि ईहमानं कुर्वन्तं आत्मानं देहं ३०

138A नविंद्रियवृत्तः सर्वथाकथमदर्शनेसंभवतितत्राह यदिस्मेति यद्यप्यसतांवहिर्मुखोनामिंद्रियाणाम
संपश्यति तथापिनानात्वात मिथ्यात्वप्रवदित्यनुमानेनविरुद्धं बाधितंसदन्यत आत्मव्यतिरिक्तम
वीषवस्तुतयानमन्यते स्वापादुत्थायप्रबुद्धसंस्कारमात्रत्वात्प्रविषयस्फुरेवभ्रानपवर्यमेवतिरोम।
व चेतंयातदृत ३१ नदेवमात्मानविक्रियतइत्युक्तं नन्वेतदुपपन्नंदेहद्वावस्थयात्मज्यमानत्वात मुक्ता
वस्थयाचपरिगृह्यमाणत्वाद्विद्वीहयोत्रधानेनवाहिभावत्यागात्तदुत्तभावनापरिगृह्यमाणाविक्रियंतेतत्राह

यदिस्मपश्यत्यसदिंद्रियार्थंनानानुमानेनविरुद्धमन्यत नमन्यतेवस्तुतयामनीषीस्वाप्नंयथो
त्थायतिरोदधानं ३२ पूर्वंगृहीतंगुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग निवर्ततेतत्पु
नरीक्षयैवनगृह्यतेनापिविसृज्यआत्मा ३३ यथाहिभानोरुदयोनृचक्षुषांतमोनिहंत्यानतु

द्वैतमिति बंधादस्वापा \ सद्विधत्ते एवंसमीक्षानिपुणासतीमेहन्यात्तमिस्रंपुरुषस्यबुद्धेः ३४

गुणैःकर्मभिश्चविचित्रमज्ञानकार्यंदेहेंद्रियादिलक्षणंअध्यासिनात्मनिअविविक्तंसदीनमासीत्तदेवपु
नर्ज्ञानेननिवर्तते आत्मानुनकेनापित्यज्यते अयंभावः मुक्तेक्रियाफलत्वेनतावदात्मनोविकार
स्तस्यात्मावरोपिताज्ञानमात्रनिवृत्तिरूपत्वात नात्मसंस्पर्शित्वंबंधमोक्षयोः अतोनविकारइति ३४ न
देवदर्शनेनस्पष्टयति यथेति नन्वेवमेव उदयादिषुनविधत्तेकोतिचसमीक्षाआत्मविद्या ३५

भा॰पु॰ आत्मनो निर्विकारत्वं प्रपंचयति एष इत्यनेनापरोक्षतया नित्यप्राप्तस्यात्मनः प्राप्तिं वारयति स्वयंज्योतिर
टी॰ त्यनेनान्यप्रकाशकरणलक्षणां विकृतिं वारयति अज इत्युत्पत्तिं वारयति अप्रमेय इति ज्ञानलक्षणानिप्राप्य
१३९ नेन संस्कारं महानुभूतिरिति देशकालपरिच्छेदात्मिकां वृद्धिं विपरिणामापक्षयनाशान् स्वयंज्योति
ष्ट्वादेवेतः सकलानुभूतिरिति एकोऽद्वितीय इति विकारहेतोरन्यस्याभावान्न कोऽपि विकार इति दर्शय
ति ननु स्फूर्तिविषयस्य कथं स्वयंज्योतिष्ट्वमित्यत आह वचसां विरामैः अगोचरत्वेन निवृत्तैर्मोसम्या तया
च स्फूर्तिः यतो वाचो निवर्तन्ते अप्राप्य मनसा सहेति ननु केन येनेषिताः प्रेषिताः तया च स्फूर्त्या केन

एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः एकोऽद्वितीयो वचसां विरामे येनेषिता
वागसवश्चरन्ति ३५ एतावानात्मसंमोहो यद्विकल्पस्तु केवले आत्मन्नृते स्वमात्मानमव
लंबो न यस्य हि ३६

षितं प्रवर्तितं प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः केनेषितां वाचमिमां वदन्ति
चक्षुः श्रोत्रं क उ देवो युनक्ति श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरिति ३५
अद्वितीयत्वमुपपादयितुं भेदस्यावास्तवत्वमाह एतावानिति केवले अभिन्नेऽप्यात्मनि आत्मनि विकल्पय
ति यदेतावानेवासावात्मनो मनसः संमोहः भ्रमः एतः स्वमात्मानमृते विना यस्य विकल्पस्यावलंबनमाश्र
यो नास्ति एतन्मममस्य वस्तुनोऽपि विना नेहनानास्ति किंचन इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः

[illegible] ३६

१३९

परं

केचित्तु नः प्रमत्तादिप्रतीतप्रपंचस्य बाधायोगात् वेदांतार्थानां च क्रतुत्वमर्थकत्वं प्रतिपादितं विनार्थवादत्वा
त् द्वैतमसत्यमितिमन्वानास्तन्मतमनूद्य दूषयति यदिति नामाकृतिभिर्नामरूपोपलक्षितं पंचभूतात्मकं।
द्वैतं यत्तदबाधितमिति पंडितमानिनां अत्र वयमेव पंडिता इत्यभिमानवंतो वेदांतेष्वप्यर्थवाद इति प्रती
नापिविनाप्यर्थं तिः ततत्वविदां पुनः व्यर्थेन समा प्रतीतिः तथाहि तेनावद्वैकवाक्यत्वेनाप्रमलिप्सुनार्थवादत्वसाम्ये वाक
र्म भोक्तृपरमानंदरूपात्मप्रतिपादनरूपं कर्मविधिशेषतां भजतेन चाबाधितं द्वैतस्य नामरूपात्मकं।

यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितं व्यर्थेनाप्यर्थवादोऽयं द्वयं पंडितमानिनां ३७ योगिनोऽप
क्वयोगस्य युंजतः काय उत्थितैः उपसर्गैर्विहन्येत तत्रायं विहितो विधिः ३८ योगधारणया कां
श्चिदुपसर्गान्विनिर्दहेत् कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः योगेश्वरानुवृत्त्या वा हन्या
दासनैर्धारणान्वितैः तपोमंत्रौषधैः कांश्चि ० दशुभदाञ्छनैः ४०

त्वात् ग्राह्यत्वात्पंचवर्णात्मकत्वात्स्वप्नवद्विद्या उभे नेवावारंभणादिश्रुतिभिर्बाधितत्वादिति ३७
तदेवं ज्ञानयोगस्योपाकरं निरूप्य तद्विघ्नहेतून्विघ्नस्य विघ्नप्रतीकारमाह योगिन इति त्रिभिः योगं युंजतः काया
दुत्थितैर्वैतयत्नैरुपसर्गैः रोगाद्युपद्रवैः अभिभूयते तेभिः प्रतीकारः ३८ योगधारणयासनाग्नितापादीन् आस
नैर्वायुधारणान्वितैर्वातादीन् तपोमंत्रौषधैः पापग्रहैः सर्पादिकृतान ३९ ममानुध्यानादिभिः कामा।

पं ३ दिनयोगिनश्श्रमसंसमामामानैदसदाल

भा.प. अन्ये तु देहस्थैर्यमेव तत्फलं कुर्वन्ति न तु दूषयन्ति केचिदिति केचिन्मुनयोऽन्ये उपायैर्देहमेव सुकल्पं जरारो
टी. गादिरहितं वयसि तारुण्ये स्थिरं च कृत्वा अष्टहृत्परकायप्रवेशादिसिद्धये तत्तद्वारेण रूपं योगं युञ्जन्ति
न तु ज्ञाननिष्ठारूपं ४१ कुशलैः प्रोक्तेनादरणीयं न भवति वनस्पतिवृक्षवदात्मस्थैर्ये शरीरं तु फल
१५० वत्तस्थास्नुमित्यर्थः ४२ क्वचित्समाध्यगत्वेनापि प्राणायामादियोगक्रियमाणो जरारोगाद्यभावो दृश्यते
140 सत्यं तथापि समाधिमुत्सृज्य न तत्र सज्जेनेत्याह योगमिति तत्तदा देहनिसिद्धिं न श्रद्दध्यात् न विश्वसेत्

केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं विधाय विविधोपायैरथ योगं युञ्जन्ति सिद्धये ४१ नहि तत्कु
शलादृत्यं तदायासो ह्यपार्थकः अन्तवत्वाच्छरीरस्य फलस्येव वनस्पतेः ४२ योगं निषेवतो नि
त्यं कायश्चेत्कल्पतामियात् तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः ४३ योगचर्यामिमां यो
गी विचरन्मदपाश्रयः नान्तरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः ४४ इति श्रीभागवते एकादश
स्कन्धे योगनिर्णयो नाम २८

४३ नन्वेवं विघ्नप्रतीकारैर्योगं कुर्यादित्युक्तं मच्छरणस्य तु न विघ्नश
कापीत्याह योगचर्यामिति विचरन्नाचरन् कुर्वन् स्वसुखेऽनुभूः अनुभूतिर्यस्य सः स्पृहामूलादि
विघ्नाः सा च मदपाश्रयनिवर्तनेन अन्तरायैरविहतः स्वानन्दशालो भवतीति ४४ समाहृत्य स्वयोगानमु
मेलापनिषद्रसं सात्यमुत्यो न मा भक्तिं मुक्तो पुरुषादिशत् १ इति श्रीभावार्थे एकादशेऽष्टाविंशः २८ १५०

[Margin] ति केवलं गर्विता भवेति ननु मुच्यन्तस्यार्थः अ० २८

140A

उनर्विरोनयः पूर्वं विस्तरेणानिरूपितः भक्तियोगस्तमेवाद्य स्वभक्ताय समासतः १ अतिक्लेशमिवालक्ष्य
योगस्य लोकसंपदि सुखोपायं पुनः कृष्णमुद्धवः परिपृच्छति २ अनात्मनः अवशीकृतमनसः अजसाधि
१ यामतो यथासिद्धो न योजना स्वसेव्यं यथा तथा मे बहिः सद्भुक्षरं प्रपंचयति प्रायशः इति मनो युञ्जतो निगृ
हतः सीदति निश्चयति कुतः असमाधानात् अनिग्रहात् कथंचिन्मनसो निग्रहे च कर्शिताः प्रयाता इ

उद्धव उवाच सुदुश्चरामिमां मन्ये योगचर्यामनात्मनः यथाञ्जसा पुमान्सिद्ध्येत्तन्मे ब्रू
ह्यञ्जसाच्युत १ प्रायशः पुण्डरीकाक्ष युञ्जन्तो योगिनो मनः विषीदन्त्यसमाधानान्मनोनि
ग्रहकर्शिताः २ अथात आनन्ददुघं पदाम्बुजं हंसाः श्रयेरन्नरविन्दलोचन सुखं नु विश्वे
श्वर योगकर्मभिस्त्वन्माययामी विहता न मानिनः ३ ॥

नः ३ यस्मादेवं केवलं विषीदन्ति अथात अत एव ये हंसाः सारासारविवेकचतुराः ते त्वानन्ददुघं सा
मस्तानन्दपरिपूरकं तव पदाम्बुजमेव सुखं यथा भवति तथा नु निश्चितं श्रयेरन् हे अरविन्दलोचन इमे च ते अमी
त्वन्मायया विहिताः केचिद्योगिकर्माभिमानिनः सन्तो न श्रयन्ते यद्वा अमी त्वद्भक्ताः त्वन्मायया न विहि
ताः अत एव कर्मभिः कृत्वा मानिनो न भवन्ति अन्ये तु त्वन्मायया मोहिताः सन्तो वयं योगज्ञा वयं कर्मकुशला इ

पेज

नन्वतोऽस्तु त्वत्प्रसादेव कृतार्थो भवेतिः इति वा तच्चित्रमित्याह किमिति अनन्यशरणेषु दासेषु भवतात्मसात्वल
दृष्टीनत्वे यद्रूपा वेदगोपीवलिप्रभृतिषु एतत्किं चित्रं नाश्चर्यमित्यर्थः यतो यो भवान् मृगैः मर्कटैः रूपाणो
वानरैः सह सारूप्यं सखित्वं वा रोचयत प्रीत्या स्वीकृतवान् कथंभूतः ईश्वराणां ब्रह्मादीनां या
तिः श्रीमति किरीटानि तेषां तटानि प्रान्तानि तैः पीडितं विलुठितं पादपीठं यस्य स्वयं तथाभूतोऽपि सन् ४ अ
तस्त्वां परित्यज्य कोवा नामान्यं संश्रयेदित्याह तं त्वेति तमेवंभूतं त्वां वा को नु विसृजेत् कथंभूतः स्वकृतवि
त् वलिदानप्रह्लादादिषु त्वया कृतमनुग्रहं जानन् यद्वा स्वस्मिन्नेवान्तर्यामितया कृतमुपकारं विद्वान् त

किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्वं योरोचयत्सह मृगैः स्वयमी
श्वराणां श्रीमत्किरीटतटपीडितपादपीठः ४ तं त्वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थ
दं स्वकृतविद्विसृजेत को नु कोवा भजेत्किमपि विस्मृतये नु भूत्यै किं वा भवेन्न तव पादरजोजुषां नः

देवाह अखिलात्मदयितेश्वरं अखिलजगतः आत्मानं चेतयितारं चेतनाभूतेष्वात्मत्वाद्देवदयितं प्रेष्ठं स्तुते
वैश्वरत्वाद्देवं यपभजनीयं आश्रितानां सर्वार्थदं नहिं किं फलादेशोन सेव्यमहं न हि न हि किमपि अनिह
तत्वं स्मृतिरितिं स्वर्गादि त्वया दत्तमपि कोवा भजेत् सेवेत कथंभूतं तत् यत्केवलं भूत्यै इन्द्रियभोगाय अ
अनंतरमेव त्वद्विस्मृतये भवति यद्वा त्वय्यतिरिक्तदेवतान्तरधर्मज्ञानादिसाधनं वा भूत्यै ऐश्वर्याय प्रसा
रमाविस्मृतये मोक्षाय वा को भजेत न कोपि नन्वतत्साधनं विना भोगमोक्षादिफलप्राप्तिरित्याह किंवेति

141A

आत्मारामत्वे जनतानां स्वकृतोपकारस्य स्वल्पत्वानिवेदनेनैव निष्कृतिर्नान्यथेत्याह नैवेति अपचितिं प्रत्यु
पकारमानृण्यमितियावत् कवयो ब्रह्मविदोपि नैव शक्नुवन्ति यतस्त्वत्कृतमुपकारं स्मरन्तः ऋद्धमु
दः उपचितपरमानन्दाः उपकारमेवाह योभवानन्तर्बहिराचार्यवपुषा गुरुरूपेण अन्तश्चैत्यवपुषा अन्तर्यामि
रूपेण अशुभं विषयवासनां विधुन्वन् निरस्यन् स्वगतिं निजरूपं प्रकटयति नस्पतवै ईश्वरेश्वरं त्वदेतन्निगत

नैवोपयन्त्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरन्तः ॥ योन्तर्बहिस्तनुभृतामशु
भं विधुन्वन्नाचार्यचैत्यवपुषा स्वगतिं व्यनक्ति ६ श्रीशुक उवाच इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो ज
गत्क्रीडनकः स्वशक्तिभिः गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः ७ श्रीभगवा
नुवाच हन्त ते कथयिष्यामि मम धर्मान्सुमङ्गलान् यान्श्रद्धयाचरन्मर्त्यो मृत्युं जयति दुर्जयं ८
कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् मय्यर्पितमनश्चित्तो मद्धर्मात्ममनो रतिः

जगत क्रीडनकं क्रीडोपक
रणं यस्य सः ननु अजस्यास्य ब्रह्मादिना कथं यादृशः क्रीडेत्यत आह स्वशक्तिभिः सत्त्वादिभिर्गृहीतमूर्तित्रयो ये
श्वरः सप्रेमसहितं मनोहरं स्मितं यस्य सः सप्रेमयथा तथा जगादेति वा ७ तदेव कथयिष्यति हन्तेति सह
र्षं संबोधने सुमङ्गलान् सर्वत्र रूपान् मृत्युं संसारमिति तत्पाये ८ धर्मानेवाह कुर्यादिति द्वयोः शनकैः मास्म
रन् शनकैः असंभ्रमतः कुर्यात्तदाह मयीति अर्पितमनश्चित्ते संकल्पविकल्पात्मके येन अतएवमह

भा.ए. पुण्यदेशकालदशाणमङ्गलैरिति देवादिषु ये ये मद्भक्तास्तेषामाचरितानि कर्माणि चाश्रयेत् ९ सत्रेण संभूय वा

टी. ११ अन्तरङ्गां भक्तिमाह मामिति त्रिभिः सर्वभूतेषु चात्मनि च आत्मानं मामीश्वरं स्थितं मामेवेक्षेत कथमेक

१४२ त्वमेवं पश्यति तत्राह बहिरन्तः पूर्णमित्यर्थः तत्कुतः अपावृतमावरणं तदपि कुतः यथा खमसङ्ग।

142 त्वादित्यर्थः १२ हे महाद्युते अनेन प्रकारेण केवलं ज्ञानरूपां दृष्टिमाश्रितः सन् सर्वाणि भूता।

देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान् देवासुरमनुष्येषु मद्भक्ताचरितानि च ९ पृथक्सत्रे

ण वा मह्यं पर्वयात्रामहोत्सवान् कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ११ मामेव सर्वभूतेषु ब।

हिरन्तरपावृतम् ईक्षेतात्मनि चात्मानं यथा खममलाशयः १२ इति सर्वाणि भूतानि मद्भावेन म।

हाद्युते सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः १३ ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलि

ङ्गके अक्रूरे क्रूरके चैव समदृक्पण्डितो मतः १४

नि मद्भावेन मन्यमानः सभाजयन्पण्डितो मत

इत्युत्तरेणान्वयः १२ ननु न माद्यमेवैकरूपेण सभाजनं योग्यमेव तस्मात् श्वपचादिवातिक्रमा

दित्याशङ्क्याह तामेव ज्ञाननिष्ठां दर्शयति विषमेष्वपि समदृक् सममेव पश्यन् वैषम्यमेव च न धार

यतीति ब्राह्मणे पुल्कसे इति जातितो वैषम्यं पुल्कसोऽन्त्यजातिविशेषः स्तेने ब्रह्मस्वहारिणि ब्रह्मण्ये च

ब्राह्मणेभ्यो दातरीति कर्मतः अर्के विस्फुलिङ्गे इति गुणतः अक्रूरे शान्ते क्रूरे चेति स्वभावतः १४ ॥ १४२

142A

पंति

नरेष्वभीक्ष्णं रहितं कुर्वतः सद्यः फलविशेषमाह नरेष्विति समोत्तमहीनेषु स्पर्धादयः स्वस्मिन्नहंकारश्च इति त्रि
तयं विनश्यति १५ अतोंतर्यामीश्वरः सर्वात्मना प्रणमेदित्याह विसृज्येति स्मयमानान्हसतः स्वान्सखीन्लज्जां दे
हिकीं दृशमहं मम तमः सतत्वीत्वदृति दृष्टिं च व्रीडां लज्जां त्यक्त्वा विसृज्याश्वचांडालादीनपि व्याप्य प्रणमे
त् नतु विशेषं कुर्यादित्यर्थः १६ एवं पंचभिः श्लोकैरुक्तायाः समदृष्टेरवधिमाह द्वाभ्यां यावदिति १७ नरेष्व

नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् स्पर्धासूयातिरस्काराः साहंकारा वियंति हि १५ विसृज्य स्म
यमानान्स्वान्दृशं व्रीडां च दैहिकीं प्रणमेद्दंडवद्भूमावाश्वचांडालगोखरं १६ यावत्सर्वेषु भूतेषु मद्भावो
नोपजायते तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः १७ सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीष
या परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः १८ अयं हि सर्वकल्पानां सध्रीचीनो मतो मम मद्भावः
सर्वभूतेषु मनोवाक्कायवृत्तिभिः १९ नह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि मया व्यवसितः सम्य
क्निर्गुणत्वादनाशिषः २०

एवं वर्ततः पुंसः सर्वं ब्रह्मात्मकं भवति कुतः आत्ममनीषया सर्वत्रेक्षणात्
स्याया विद्यातया अतः परितो ब्रह्मैव पश्यन्सर्वतः क्रियामात्रादुपरमेत् १८ किमयमेवोपायः अन्यत्रैवान्योपी
त्यपेक्षायामतिवरत्वः समीचीनत्वयमेवेत्याह अयं हीति १९ भगवद्धर्मलक्षणोपायस्य समीचीनत्वमेवोप
पादयति द्वाभ्यां नहीति अंगहे उद्धव अनाशिषो निष्कामस्य मद्धर्मस्य उपक्रमे सति अण्वपि ईषदपि ध्वंसो नास्ति
इति निर्गुणत्वादेव यतोऽयं धर्मो निर्गुणत्वादयं धर्मः सम्यग्व्यवसितो निश्चितः नतु मन्वादिमुखेन कथंचित् २० ॥

ति

भा.ए. किंच अयमर्थः किंवलं धर्मस्यानर्थत्वमाहेति यतो लोके कोपि यो यो निरर्थो व्यर्थ आयासः सोपि मयि
टी. मयि निष्फलाय चेत्कल्प्यते निष्कामतयार्पितश्चेत् तर्हि धर्म एव स्यात् निरर्थो यो सद्दृष्टान्तः भयाभयशो
काद्देहिनोः पलायनक्रंदनादिक्लेशमालक्षते अतो मद्भजनं मे बुद्धेर्विवेकस्य मनीषायाश्चात्र परमफल
१४३ मित्याह तां मे वदर्शयति सत्यममृतं च मां मां अनृतेनासत्येन मर्त्येन विनाशिना मनुष्यदेहेन इहा
143

यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत् तदायासो निरर्थः स्याद्भयादेरिव सत्तम २१ एषा बुद्धि
मतां बुद्धिर्मनीषा च मनीषिणां यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं २२ एष तेभिहितः कृत्स्नो
ब्रह्मवादस्य संग्रहः समासव्यासविधिना देवानामपि दुर्गमः २३ अभीक्ष्णशस्ते गदितं ज्ञानं वि
स्पष्टयुक्तिमत् एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः २४ सुविविक्तं तव प्रश्नं मयैतदपि धार
येत् सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति २५ य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं तस्या

स्मिन्नेव जन्मनि प्राप्नोतीति यत्सेव बुद्धिर्मनीषा बुद्धिर्विवेकः म.\ हं ब्रह्मदायस्य ददाम्यात्मानमा
नीषा चातुर्यं २२ महाप्रकरणार्थमुपसंहरति एष तेऽभिहिताभ्यां २३ २४ किंच आम्नातानां ज्ञा
नेच तत्त्वं तथा च कथन पठन पारायणमध्येन देव फलं भवतीत्याह चतुर्भिः सुविविक्तमिति मया
सुविविक्तं तवोत्तरं एतदाख्यानमपि धारयेत् अनुसंदध्यात् सः ब्रह्मगुह्यं वेदेपि रहस्यं २५ सुपुष्कलं १४३

143A

समधीयीत उच्चैः पठेत् परमं शुचि शुद्धं तेषामपि शोधकं स पूयेत शुद्ध्येत २७ सम्यग्ज्ञातं नामन्येनो पुनरुपदेक्ष्यामीत्याश
येन पृच्छति अपीति किमवधारितमाकलय्याह २९ नैतदिति शठाय वञ्चकाय ३० अशुश्रूषोः सेविना च यदि
भक्तिः स्यात्तर्हि ब्रूयात् ३१ एतज्ज्ञानेन च कृतार्थो भवतीत्याह नैतद्विदिति अत्र दृष्टान्तमाह पीत्वेति पीयूष
स्वादु ३२ ननु मन्निवहूनि ज्ञेयानि तत्फलसाधनानि नामृतत्वं स्वभक्तानां भक्तस्य तु सर्वमहमेवा मदेकशरणाम

य एतत्समधीयीत पवित्रं परमं शुचिः स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन् २७ य एतच्छ्रद्धया
नित्यमव्यग्रः शृणुयान्नरः मयि भक्तिं परां कुर्वन्कर्मभिर्न स बध्यते २८ अप्युद्धव त्वया ब्रह्म सखे
समवधारितं अपि ते विगतो मोहः शोकश्चासौ मनोभवः २९ नैतत्त्वया दाम्भिकाय नास्तिकाय
शठाय च अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां ३० एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च
साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां ३१ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते पीत्वा पी
यूषममृतं पातव्यं नावशिष्यते ३२ ज्ञाने कर्मणि योगे च वार्तायां दण्डधारणे यावानर्थो नृणां तात
तावांस्तेऽहं चतुर्विधः ३३

वेत्याह ज्ञान इति ज्ञानादीनां यावानर्थो मोक्षादिलक्षणस्तत्त्वविधार्यस्तावान्
सर्वोऽपि तेऽहमेव तत्र ज्ञाने मोक्षः कर्मणि विहिते धर्मः कर्मण्येव स्वाभाविके न कामः योगेऽणिमादिसिद्धयः
वार्तायां कृष्यादावर्थः दण्डनीतावैश्वर्यमिति सिद्ध्यैश्वर्ययोरपि कामान्तर्गत्वाच्चातुर्विध्यम् ३३ ॥

भा.प. कुतस्तत्राह मर्त्य इति यदा त्यक्तसमस्तकर्मा सन् मे निवेदितात्मा भवति तदा मे मे विचिकीर्षितः वि
टी. शिष्टः कर्तुमिष्टो भवति ततश्चामृतत्वं मोक्षं प्रतिपद्यमानो मयात्मभूयाय मद्देवत्वाय मत्समानैश्वर्याय
निर्यावत् कल्पते योग्यो भवति वै प्रसिद्धं ३४ आदर्शितो योगमार्गो यस्मै सः प्रणयेनावघूर्णितं दोलितं
१४४ चित्तं धैर्येण विष्टभ्य बहुमानः आत्मानं कृतार्थं मन्यमानः ३६ मया यस्त्वाश्रितो य आसीत् स तव सन्निधानेन

144

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे तदामृतत्वं प्रतिपद्यमानो मयात्मभूया
य च कल्पते वै ३४ श्रीशुक उवाच स एवमादर्शितयोगमार्गस्तदोत्तमश्लोकवचो निशम्य बद्धा
ञ्जलिः प्रीत्युपरुद्धकण्ठो न किंचिदूचेऽश्रुपरिप्लुताक्षः ३५ विष्टभ्य चित्तं प्रणयावघूर्णं धैर्येण राज
न्बहुमन्यमानः कृताञ्जलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविन्दं ३६ उद्धव उवाच विद्रा
वितो मोहमहान्धकारो य आश्रितो मे तव सन्निधानात् विभावसोः किं नु समीपगस्य शीतं तमो भीः प्र
भवन्त्यजाद्य ३७ प्रत्यर्पितो मे भवतानुकम्पिना भृत्याय विज्ञानमयः प्रदीपः हित्वा कृतज्ञस्तव पाद॥
मूलं कोऽन्यं समीयाच्छरणं त्वदीयं

वशिष्ठवितः प्रभवन्ति किंतु बाधाय समर्था न भवन्तीति अजयोरहस्य
णोपि जनकः ३७ किंच यद्यपि तव सन्निधानादेव गतः तथाप्यनुकम्पिना भवता विज्ञानमयः प्रदीपश्च
प्रत्यर्पितः स्वमाययापहृतः पुनः समर्पितः अतस्तव कृतज्ञः यस्त्वया कृतमनुग्रहं जानाति स को नाम॥

॥ त्वदीयं पादमूलं हित्वा अन्यच्छरणं समीयात् आश्रयेत् २८

१४४

किंच दासाधिकारिषु न्यायः स्वमायया स्नेहपाशः प्रसारितः संन्येयेवात्मतत्वज्ञानेन स्नेहपाशच्छिन्नः ३९
एवंपयपिन्वयावद्रकेनेनतथाप्येनावन्मार्थयते नमोस्त्विति अनुशाधि अनुसितस्य अनुशासनीयमाह
पंथेति मुक्तावप्यनपायिनी ४० तदुद्भवेनोमेंगीकृत्य तथापि मयादिष्टो लोकसंग्रहार्थमेनावलंकृतिन्याह

तृकाश्रमे सुरस्त्तः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितः सृष्टिवृद्धये न यात्मायया।
ययात्मसवोधहेतिना ३९ नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां यथा त्वच्चरणांभोजे
रतिः स्यादनपायिनी ४० श्रीभगवानुवाच गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं तत्र
मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचिः ४१ ईक्षयालकनंदाया विधूताशेषकल्मषः वसा
नो वल्कलान्यंग वन्यभुक्सुखनिःस्पृहः ४२ तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः शांतः स
माहितधियाज्ञानविज्ञानसंयुतः ४३ मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन् मय्यावेशितवा
क्चित्तो मद्धर्मनिरतो भव अतिव्रज्य गतीस्तिस्रो मामेष्यसि ततः परं ४४
गच्छेति आदिष्टो नियुक्तः ४१ स्नानादेः फलं मत्पादतीर्थोदे भूताया अलकनंदाया गंगायाः ईक्षयावसा
नः परिधानः वन्यभुक् यथाप्रासभोजी ४२ द्वंद्वमात्राणां शीतोष्णादिविषयाणां सुशीलः आर्जवादिस्वभावः
४३ तत्वया विविक्तं सविचारं निर्मितस्त्रः त्रिगुणात्मिका गतीरतिक्रम्य ४४ ॥

भा.प. हरिमेधसः संसारं हरति मेधा यस्य तेन श्रीकृष्णेन अद्वंद्वपरोपि सुखदुःखनिर्मुक्तोपि उपक्रमे निर्गमन

टी. समये ४५ सुदुस्त्यजः स्नेहो यस्मिन् तेन वियोगात्कातरो भीतः अत एव तं परिहातुं न शक्नुवन्नातुरो वि

१४५ ह्वलः सन् कृच्छ्रं कष्टं ययौ प्राप ततश्च भर्तुः पादुके नैनेव कृपया दत्ते मूर्ध्नि बिभ्रत् अतिनिर्वेदरूपया।

145 न दातव्या न पुनः पुनर्नमस्कृत्य ययौ अत्र च पृष्ठतो न्यागमभर्तुः पादविश्लेषणात्तमहं न्यादिन्तीयस्तयो

पक्रमोक्तानुसारेण च बदरिकाश्रमं गच्छन् श्रीभगवतः प्रभासयात्रायामुपक्रान्त्यपाने: दृष्टतया।

श्रीशुक उवाच इत्युक्तो हरिमेधसोद्धवः प्रदक्षिणं तं परिसृत्य पादयोः शिरो निधायाश्रु- १७

कलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोप्युपक्रमे ४५ सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं

परिहातुमातुरः कृच्छ्रं ययौ मूर्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः ४६ ततस्त-

मन्तर्हृदि सन्निवेश्य गतो महाभागवतो विशालां यथोपदिष्टां जगदेकबन्धुना तपः समास्थाय

हरेरगाद्गतिं ४७

तः सन् उपसंहृतनिजकुलं श्रीभगवंतमेकांते दृष्ट्वा तत्कालमागमेने मैत्रेयेण सह

पुनः कृपया श्रीभगवतोपदिष्टं तत्त्वमाकलय्य तदा तत्र यथाविधि दृष्ट्वा ४६ विशालां बदरिकाश्रमं गत्वा

तः श्रीहरेर्गतिमगात् कथंभूतां गतिं तेनैव जगदेकबन्धुना श्रीकृष्णेन यथोपदिष्टां यादृग्उपदेशी कृ

ता तदामृतत्वं प्रतिपाद्य मामेव यात्मभूयाय च कल्पते नैव अतितिरज्ज्यगतीश्लिष्टामामेष्यसि ततः परामि। १४५

145A

आनंदसमुद्रः श्रीभगवदुक्तिमार्गः तस्मिन्संभृतं एकीकृतं एतद्यः सच्छ्रद्धया आसेव्य ईषदपि सेवित्वा वर्त्ते तेन विमुच्यते इति किं वक्तव्यं तत्संबंधात् जगदपि विमुच्यत इत्यर्थः ४८ एवं कृतोपदेशं जगद्गुरुं श्रीकृष्णं प्रणमति भवभयमिति भवः संसारः भयं जरारोगादिनिमित्तं तद्भयं निवृत्तानां स्वभृत्यवर्गाणां यथा येन अमृ-
तं तथा अमृतद्वयमुपजह्रे तत उद्धववचनात् तदेवाह वेदसारमेकं किं तत् ज्ञानविज्ञानरूपं च तस्मा

य एतदानंदसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितं कृष्णेन योगेश्वरसेवितांघ्रि-
णा सच्छ्रद्धयासेव्य जगद्विमुच्यते ४८ भवभयमपहंतुं ज्ञानविज्ञानसारं निग-
मकृदुपजह्रे भृंगवद्वेदसारं अमृतमुदधितश्चापाययन्भृत्यवर्गान्पुरुषमृषभमा-
द्यं कृष्णसंज्ञं नतोस्मि ४९ इति श्रीभागवते महापुराणे एकादशस्कंधे श्रीभगवदुद्ध-
वसंवादे एकोनत्रिंशोध्यायः २९

देश्चेदं च भृंगवत् भृंगो यथा पुष्पेभ्य एकमपि यत्नेनामृतं मधु उपसंहरति तस्मात्स्वयं कृतवेदात्तु सारे
णैव उदधितश्चैक तद्वाभयं यथा येन भृत्यवर्गानपाययत् तं नतोस्मि इति ४९ येनानुकंपितविश्वमु
द्धवमलनिर्णयैः तं वंदे परमानंदनंदनंदनरूपिणं १ इति भावार्थे एकादशस्कंधे एकोनत्रिंशोध्यायः

भा.पु. टी. १४९ 146

विशेन प्रागुपलितिं मेमो वालक्ष्वलतोदरीः स्वधाम गंतुमन्विच्छन्सन्नेतहारनिजं कुलं १ विस्मायपश्रावोरस्तुप
तिंमद्विमेशालं कथावसानेनत्रैवविशेषपरिपृच्छति २ ततइति त्रिभिः १ ब्रह्मशापोपसंसृष्टे स्वतिस्व।
कुले ऽप्ययभावः श्रीभगवतिमद्विशापः प्रभवतियाद्वत्वानुकरणाद्य सोपि कथं चिन्मान्यः अतः किमक
रोदिति तदेतदुक्तं कथमत्यजदिति सर्वतेजसामिति सर्वेन्द्रियोपलक्षणं २ तत्प्रपचयति यस्मिन्।

राजोवाच ततो महाभागवते उद्धवे निर्गते वनं द्वारवत्यां किमकरोद्भगवान्भूतभावनः १ ब्रह्मशा
पोपसंसृष्टे स्वकुले यादवर्षभः प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् २ प्रत्याक्रष्टुं नयनमब
लायत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं यच्छ्रीर्वाचां जनयति रतिं कि
यमानाकवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ३ श्रीशुक उवाच दिवि भुव्यंत
त्रैपेतलग्नं स्वयं परावर्त्त \ रिक्षे च महोत्पातान्समुत्थितान् दृष्ट्वासीनान् सुधर्मायां कृष्णः प्राह यदूनिदं ४
यितुमबलानशेकुः यच्च कर्णरंध्रेणाविष्टं तत्सतामात्मनि लग्नं चित्रे लिखितमिव तिष्ठति ततो न सरति
न निर्गच्छति यस्य श्रीः शोभा संकीर्त्यमानाकवीनां वाचां रतिमुल्लासविशेषं जनयति तेषां मानं जगत्यु
ज्यंतां जनयतीति किं तु वक्तव्यं यच्च जिष्णोरर्जुनस्य रथेस्थितं दृष्ट्वा युधि मृतास्तत्साम्यं सारूप्यमीयुः तत
केन हेतुनात्यजदित्यन्वयः ३ दिवि सूर्यपरिवेषादीन् भुवि भूकम्पादीन् अंतरिक्षे दिग्दाहादीन् महो

१४९

146A

यमस्यकेनतोध्वमाइवमनुसूचकाइत्यर्थः तःअस्माभिः ५ प्रत्यकूपश्चिमवाहिनी ९ अभिषिच्यहात्मा
७ ब्राह्मणाश्चतैःकृतयात्रिकाः ततोगवादिभिःपूजयिष्यामः ८ विधिःप्रकारोमंगलायनंच किंचतत
देवद्विजगवांपूजाभवःउद्भवेस्तुः देवलोकेपरमउद्भवोभवतीतिभावः ९ मधुद्विषाहरेर्वाक्यमाकर्ण्यतत

श्रीभगवानुवाच एतेद्योरामस्तोत्यानाद्वार्वत्यापमकेनवः मुहूर्त्तमपिनस्थेयमत्रनोयदुपुंगवा
५ उत्तिष्ठतयदुश्रेष्ठास्थानमन्यंतोव्रजिष्यते स्त्रियोवालाश्चवृद्धाश्चयांतोद्धारवतींततः वयंप्रभा
सयास्यामोयत्रप्रत्यक्सरस्वती तत्राभिषिच्यशुचयउपोष्यसुसमाहिताः देवताःपूजयिष्यामःस्न
पनालेपनार्हणैः ७ ब्राह्मणांस्तुमहाभागान्कृतस्वस्त्ययनावयं गोभूहिरण्यवासोभिर्गजा
श्वरथवेश्मभिः ८ विधिरेषह्यरिष्टघ्नोमंगलायनमुत्तम देवद्विजगवांपूजाभूतेषुपरमोभवः
९ इतिसर्वेसमाकर्ण्ययदुवृद्धामधुद्विषः तथेतिनौभिरुत्तीर्यप्रभासंप्रययूरथैः १० तस्मिन्भगव
तादिष्टंयदुदेवेनदानवाः चक्रुःपरमयाभक्त्यासर्वश्रेयोपबृंहितं ११ ततस्तस्मिन्महापानेपपु
मैरेयकमधु दिष्टविभ्रंशितधियोयद्द्रवैर्भ्रंश्यते
येत्यभिनंद्यसमुद्रयानेनोत्तीर्यसमुद्रं १० सर्वश्रेयोपबृं
हितमितिसर्वपापाघैः श्रीभगवताज्ञप्तैरपिसर्वैःश्रेयोभिःसहितंचक्रुः ११ पीयतेइतिपाने मैरेयकंमद्यं
विशेषे मधुमासे दिष्टेनदैवेनविभ्रंशितानाधियःतद्यन्यथातस्मिन्स्थानेनतुचितमितिभावः यस्मादैवेःर

भा.पु. टी. १४० 147

श्रीकृष्णमायाविमूढानामिति सुमहान्योद्धेतुः सङ्घर्षः कलहो युद्धम् १३ ततो युयुधुः १४ पतत्पदनिल्ल।
तस्थलेत्यः पताकोपयुक्तैरथादिभिः मिथः समेत्य न्यहनन् न्यघ्नन्निति अर्थः १५ मिथो योद्धव्यसमेत्य एत
सुप्रपञ्चयति प्रद्युम्नेत्यादिचतुर्भिः गदो श्रीकृष्णस्य भ्राता चैकः पुत्रश्चापरस्तौ सुमित्रासुरथाविति द्वौ।

महापानाभिमत्तानां वीराणां दृप्तचेतसां कृष्णमायाविमूढानां सङ्घर्षः सुमहानभूत् १३ युयु
धुः क्रोधसंरब्धा वेलायामाततायिनः धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः १४ पतत्पता
कै रथकुञ्जरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि मिथः समेत्याश्वतरैः सुदुर्मदा न्यहन्शरैर्दद्भि
रिव द्विपा वने १५ प्रद्युम्नसाम्बौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी सुभद्रसङ्ग्राम
जितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः १६ अन्ये च ये वै निशठोल्मुकादयः सहस्रजि
च्छतजिद्भानुमुख्याः अन्योन्यमासाद्य मदान्धकारिणो जघ्नुर्मुकुन्देन विमोहिता भृशं १७ दाशा
र्हवृष्ण्यन्धकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः विसर्जनाः कुकुराः कुन्तयश्च मिथस्तु जघ्नुः
सुविसृज्य सौहृदं १८

ते भ्रातरौ सुरथनामा चान्यः कश्चित् १६ मदान्धेन मदेन समस्तावल्लांस्कारिणः १७ दाशार्हादयोऽनय
तत्तद्वंश्याः अर्बुदाः माथुराः शूरसेनाश्च तत्तद्देशीयाश्च १८ ॥ ॥

भ्रातृभिश्चेति भ्रात्रादिशब्दानां सप्रतियोगिसंबंधित्वात् भ्रातरो मातुलादय इत्यादि ज्ञेयं मित्राणि मित्रैश्च सुहृद्
हतवंतः १९ धनुषु जगदुः जगदुः २० परिघा लोहदंडाः भग्ना धृताः नैव श्रीकृष्णमपि २१ प्रत्यनीकं प्रति

पुत्रा अयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्त्रीयदौहित्रपितृव्यमातुलैः मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञा
तींस्त्वहन्ज्ञातय एव मूढाः १९ शरेषु हीयमाणेषु भज्यमानेषु धन्वसु शस्त्रेषु क्षीयमाणेषु मुष्टि
भिर्जह्रुरेरकाः २० ता वज्रकल्पा ह्यभवन्परिघा मुष्टिना भृताः जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणा
स्तु तं च ते २१ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः हंतुं कृतधियो राजन्नापन्ना आततायिनः
२२ अथ तावपि संक्रुद्धावुद्यम्य कुरुनंदन एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि २३ ब्रह्मशापो
पसृष्टानां कृष्णमायावृतात्मनां स्पर्धाक्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वनं २४ एवं नष्टेषु सर्वे
षु कुलेषु स्वेषु केशवः अवतारितो भुवो भार इति मेनेऽवशेषितः २५ रामः समुद्रवेलायां योगमास्था
य पौरुषं तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि २६ रामनिर्याणमालोक्य भगवान्देवकीसु
तः निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं २७

पदे २२ एरकामुष्टिरूपौ परिघावुद्यम्य २३ स्पर्धा परस्परं साम्यं स्पर्धा तन्निमित्तः क्रोधः कुलं संक्षयं निन्ये २४
२५ पौरुषं योगं श्रीपरमेश्वरपुरुषध्यानलक्षणं तमेवाह संयोज्येति मानुष्यं लोकं भूर्लोकं मनुष्यरूपतां

भा॰ ११ एकादशोत्तरटी॰ २०

भा.प. भ्राजिष्णुःशोभमानंरूपं २८ तंदेवानुवर्णयति श्रीवत्सांकमितिचतुर्भिः २९ सुंदरंरमणीयकं स्मितंय
टी. स्मितंयस्मिंस्तत् वक्त्रमेवाब्जंयस्मिंस्तत् पुंडरीकवदभिरामेसुंदरेअक्षिणीयस्मिंस्तत् ३०।३१ वन
१४८ 148

बिभ्रच्चतुर्भुजंरूपंभ्राजिष्णुप्रभयास्वया। दिशोवितिमिराःकुर्वन्विधूमइवपावकः २८ श्रीव।
त्सांकंघनश्याममतप्तहाटकवर्चसं कौशेयांबरयुग्मेनपरिवीतंसुमंगलं २९ सुंदरस्मितवक्त्रा।
ब्जंनीलकुंतलमंडितं पुंडरीकाभिरामाक्षंस्फुरन्मकरकुंडलं ३० कटिसूत्रब्रह्मसूत्रकिरीटक
टकांगदैः हारनूपुरमुद्राभिःकौस्तुभेनविराजितं ३१ वनमालापरीतांगंमूर्तिमद्भिर्निजायुधैः।
धैः कृत्वोरौदक्षिणेपादमासीनंपंकजारुणं ३२ मुसलावशेषायःखंडकृतेषुर्लुब्धकोज
रा मृगास्याकारंतच्चरणंविव्याधमृगशंकया ३३ चतुर्भुजंतंपुरुषंदृष्ट्वासकृतकिल्बिषः भीतः
पपातशिरसापादयोरसुरद्विषः ३४ अजानताकृतमिदंपापेनमधुसूदन क्षंतुमर्हसिपापस्य।
उत्तमश्लोकमेनघ ३५ यस्यानुस्मरणंनृणामज्ञानध्वांतनाशनं वदंतितस्यतेविष्णोमयासा।

मालापरीतान्यंगानियस्मिंस्तत् निजायुधैःपरीतांगं पंकजारुणंवामपादंदक्षिणेऊरौकृत्वाआसीनं
रूपंबिभ्रत् ३२ जरानामकश्चिल्लुब्धकोमृगायुः मृगास्यसंस्थमिवाकारोयस्यतंचरणम् ३३ ३४

148A

३७ त्वन्मांसंजरिवैकुंठपाप्मानंमृगलुब्धकं यथापुनरहंत्वेवंनकुर्यांसदतिक्रमं ३७ यस्यात्मयो
गरचितंनविदुर्विरिंचोरुद्रादयोस्यतनयापतयोगिरांये त्वन्माययापिहितदृष्टयएतदंजः।
किंतस्यतेवयमसद्गतयोगृणीमः ३८ श्रीभगवानुवाच माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहि
मे याहित्वंमदनुज्ञातःस्वर्गंसुकृतिनांपदं ३९ इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा
त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ ४० दारुकःकृष्णपदवीमन्विच्छन्नधिगम्यतां वायुं
तुलसिकामोदमाघ्रायाभिमुखंययौ ४१ तंतत्रतिग्मद्युभिरायुधैर्वृतंह्यश्वत्थमूलेकृतकेतनंप
तिं स्नेहप्लुतात्मानिपपातपादयोरथादवप्लुत्यसबाष्पलोचनः ४२ अपश्यतस्त्वच्चरणांबुजंप्र
भोदृष्टिःप्रणष्टातमसिप्रविष्टा दिशोनजानेनलभेचशांतिंयथानिशायामुडुपेप्रणष्टे ४३

३७ ब्रह्मण्यापकृतमेवमननननवापराधइतिचेदतआह यस्येति यस्यात्मयोगरचितंस्वाधीनमायार
चितंविरिंचि प्रभृतयोरुद्रादयश्चयेचान्येगिरांपतयोवेदद्रष्टारस्तेपिनविदुः तस्यतेत्वविंत्यमायस्य
एतदुक्तरूपमपादि अंजसा असद्गतयःपापयोनयः वयंकिंगृणीमःकथयवाणियामः अतएतत्सांत्वनमा
ष्टुमंजरीतिभावः ३८ इच्छाशरीरिणेत्ययंभावः ३९ शुद्धसत्वमयीनिजेच्छाश्रीमूर्तिसंतर्धाय तत्प्रतिकृ
तेरेवैविडंवनमात्रमिति एतदवस्फुटीकरिष्यति देवादयोब्रह्ममुख्याइत्यादिना ४०-४१ तंपतिंश्रीकृष्णंतत्र

भा॰द॰ उद्वीक्षमाणस्य सूतस्य सतः ४४ ४५ निर्याणं योगमार्गेणात्मस्थानमिति निश्चयो नास्तीत्याशयेन ४६ ४७ अवि
टी॰ ज्ञाः हन्यमानाः इन्द्रप्रस्थं गमिष्यथेति द्रष्टव्ये इति पूर्वेणान्वयः ४८ मन्मायारचनामेतां विज्ञायेति निजस्थाने
१४९ रन्तर्हितत्वात् तिरोधानाभावात् वृथा शोकं मा कुर्वित्यर्थः ४९ श्रीकृष्णान्तर्धानात् कुलस्य विनष्टत्वा

149

एवं ब्रुवति सूते वै योगरुद्धलांछनः रथमुत्पपात राजेन्द्र साश्वध्वज उदीक्षतः ४४ तमन्वगच्छन्
दिव्यानि विष्णुप्रहरणानि च तेनातिविस्मितात्मानं सूतमाह जनार्दनः ४५ गच्छ द्वारवतीं सूत
ज्ञातीनां निधनं मिथः संकर्षणस्य निर्याणं बन्धुभ्यो ब्रूहि मद्दशां ४६ द्वारकायां च न स्थेयं भ
वद्भिश्च स्वबन्धुभिः मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ४७ स्वं स्वं परिग्रहं सर्वे आदाय पित
रौ च नः अर्जुनेनाविताः सर्वे इन्द्रप्रस्थं गमिष्यथ ४८ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः
मन्मायारचनामेतां विज्ञायोपशमं व्रज ४९ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः तत्पादौ
शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ५० इति श्रीभागवते एकादशस्कन्धे मौसले यदुकुलक्षये त्रिंशो

द्युर्मनाः ५० इति भावार्थदीपिकायामेकादशस्कन्धे त्रिंशत्तमोऽध्यायः ३० एकत्रिंशे स्वकं धाम जगाम भगवानितः
तेषामवान्तरप्रयाणं वसुदेवादयस्ततः देवानुग्रहलिप्सया यादवो भूत्वो देवाविधायतनान् श्रीशुकः स्वी
स्वकीया धामस्वयन्त्रैव समाविशन् १ मुनयः सनकादयः प्रजेश्वरा मरीच्यादयः १

शुकउ॰ अथ तत्रागमद्ब्रह्मा भ॰

वान्या च समं भवः महेन्द्रप्रमुखा देवा मुनयः सप्रजेश्व
राः १

१४५

149A

द्विजाः गरुडलोकवासिनः पत्रिणः मैत्रेयादयश्च २ श्रीभगवतो निर्याणं द्रष्टुकामाः सन्तः परमोत्सुकायस्या
गमनम् तेषामौत्सुक्यकृतं महोत्सवमाह गायन्तश्चेति सार्धेन ३ ४ विभूतीः इन्द्रादींश्च पद्मनेत्रे न्यमीलय
दित्यस्यायं भावः शर्वब्रह्मादिभिः सलोकपालावृतः पाहि वैकुण्ठ किंकरानिति प्रार्थितत्वात् इदानीं स्व
स्वलोकं प्रति नेतुमागतत्वाद्द्रष्टुं चैतेषु दाक्षिण्याद्विचिपिनसमाधिमिव कुर्वन् नेत्रे न्यमीलयदिति ५ यो
गिनामिव स्वच्छन्दमृत्युभ्रमं वारयति लोकाभिरामामिति अयमर्थः योगिनो हि स्वच्छन्दमृत्यवः स्वे

पितरः सिद्धगन्धर्वा विद्याधरमहोरगाः चारणा यक्षरक्षांसि किन्नराप्सरसो द्विजाः २ द्रष्टुकामा
भगवतो निर्याणं परमोत्सुकाः गायन्तश्च गृणन्तश्च शौरेः कर्माणि जन्म च ३ ववृषुः पुष्पवर्षा
णि विमानावलिभिर्नभः कुर्वन्तः संकुलं राजन् भक्त्या परमया युताः ४ भगवान्पितान्वीक्ष्य
विभूतीरात्मनो विभुः संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ५ लोकाभिरामां स्वतनुं धार
णाध्यानमङ्गलम् योगधारणयाग्नेय्यादग्ध्वा धामाविशत्।

ते तु स्वशरीरं आग्नेय्या योगधारणया दग्ध्वा
लोकान्तरं प्रविशन्ति श्रीभगवांस्तु न तथा किं त्वदग्ध्वैव स्वतनुं सहितं एव स्वकं धाम वैकुण्ठाख्यमविशत्
तत्र हेतुः लोकानामभिरामः अभितो रमणो स्थितिर्यस्यास्तां जगदाश्रयत्वेन जगतोऽपि दाहप्रसंगादित्यर्थः
किं च धारणाध्यानयोः सुमङ्गलं शोभनं विषयं इतरथा तयोर्निर्विषयत्वस्यात् इदानीं चोपास्यमुपासका
नां तथैव तद्रूपसाक्षात्कारः फलमात्मिकमिति भावः इच्छाशरीराभिप्रायेण वा यथाश्रुतमेवास्तु न चापि वा।

पाल्मके ५

लोकाभिरामामित्यादिविशेषणानां मानसैक्यप्रसंगान्
नरदेहत्वाद्यनिरोधाय निर्गमनरत्यैव समाप्तं ५

भा.प. ततोन्तं स्वं स्वमेव लोकमागमिष्यतीति सम्भ्रमेण देवादिकृतानां सर्वतो दुन्दुभिनादपुष्पवृष्ट्यादिमहोत्सवोभव
टी. दित्याह दिवीति भूमेः सकाशात् श्रीकृष्णमनुययुः ततः श्रीकृष्णेन तद्दिने सति कृतो गतः इति वितर्क्य
११. लोपि ब्रह्ममुख्या देवादयः स्वधामनि विशन्तं श्रीकृष्णं न ददृशुः तत्र हेतुः अविज्ञातगतिं क्वचित्तद्ध
150 विद्ददृशुश्च ततोतिविस्मिता बभूवुरित्यर्थः ८ अविज्ञातगतित्वं दृष्टान्तेन स्पष्टयति सौदामिन्या।

दिवि दुन्दुभयो नेदुः पेतुः सुमनसश्च खात् सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ७ देवा
दयो ब्रह्ममुख्या न विशन्तं स्वधामनि अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ८ सौदामि
न्या यथाकाशे यान्त्या हित्वाभ्रमण्डलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ९ ब्रह्मरुद्राद
यस्ते तु दृष्ट्वा योगगतिं हरेः विस्मितास्तां प्रशंसन्तः स्वं स्वं लोकं ययुस्तदा १० राजन्परस्य तनुभृ
ज्जननाप्ययेहा मायाविडम्बनमवेहि यथा नटस्य

गतिर्यथा मर्त्यैर्न लक्ष्यते तथाभ्रमण्डलं हित्वा गच्छतः श्रीकृष्णस्य दैवैरपि न लक्ष्यते किं वक्तव्यं मर्त्यै
रित्यर्थः ९ अभिप्रायापरिज्ञानतः प्रथमश्लोके दृष्टान्तेनास्पष्टमुक्तं दृष्टं दृष्ट्वा पुनस्तमेवार्थं।
प्रपंचयति राजन्निति त्रिभिः परस्य सर्वकारणस्य तनुभृत्सु यादवादिषु जननाप्ययेहाः आविर्भाव
तिरोभावचेष्टाः मायायाः अनुकरणमेवेहि नटो यथा विकृत एव नानारूपैर्जन्मादीन् विडम्बयति तद्वत् १५०

150

आत्मनात्मवयाद्यादवादिपुत्रन्मादिशरीरकायवद्धिसर्गनिरोदिवप्रमाविकृतन एवालमित्याह स्पृष्टेति आत्मनो
स्वयमेवेदं जगत्सृष्ट्वा अन्तर्यामितेनानुविश्य आत्मनमहिम्ना स्वमहिम्ना आत्मनेन पुनरन्यथा मनसोपरतोऽस्मिन्न
वावतारे तत्त्वधावेनिरन्तिगयोरिदृश इत्याह मर्त्येनेति यमेन स्वलोकं प्रतिनीतं गुरुसुतं तेन मर्त्येन तेनैव शरी
रेण यस्मानयत् आनीतवान् शरणदः शरणागतरक्षकः त्वां च ब्रह्मास्त्रदग्धं योऽरक्षितवान् यश्चान्त
कान्तकमपि ईशं श्रीरुद्रं बाणासुरसंग्रामे जितवान् मृगयुं लुब्धकं सदेहेनैव देहेन स्वः स्वर्गमानयत्

स्पृष्टात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिमोपरतः स आस्ते ११ मर्त्येन यो गुरुसुतं यम
लोकनीतं त्वां चानयच्छरणदः परमास्त्रदग्धं जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वावने
स्वरनयन्मृगयुं सदेहं १२ तथाप्यशेषस्थितिसम्भवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक्
नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् १३

नित्ये अशेषस्थावने स्वरक्षणे अनीशः असमर्थः किं न तु परि समर्थः स्वरि किंचित्कालमत्रैव तेन वपुष्या दिवि
न्यासनिष्टत तथापीति यद्यपि उक्तप्रकारेणाशेषस्य जगतः स्थित्यादिषु अनन्यहेतुर्निरपेक्षकारणं स्व
यं यद्यस्मादशेषशक्तिधृत् तथापि यादवान् संहृत्य निजं वपुः अत्र शेषितं अवशेषितं प्रणेतुं कर्तुं नैच्छत्
स्वयमेव लोकमनयत् तत्र हेतुः मर्त्येन देहेन किंचित्कार्यमिति स्वस्थानामात्मनिष्ठानां दिव्या गतिमि
वप्रकृष्टां दर्शयन् अन्यथा तेऽपि दिव्यां गतिं मनाक्रन्ययोगबलेन देहसिद्धिं विधायात्रैव तेनुयेतरन् जन्माभ्

ष्टिकातर्कमिमावः ३९ ॥ ०

भा. पु.
टी.
१५१
151

एतांस्वकृष्णप्रकाशांपदवींगतिं तेदेवभगवतास्वलोकंगच्छता स्वदेवादीनामपितन्नामधेय उपायश्चिन्त्यत
ग्रासीनमाह दारुकइत्यादि १५ १७ कृष्णरामौस्मृतावपश्यन्तः १८ सदुक्तिभिः सन्त्यापि तथाउक्त

यएतांप्रातरुत्थायकृष्णस्यपदवींपरां प्रयतःकीर्तयेद्भक्त्यातामेवाप्नोत्यनुत्तमां १४ दारु
कोद्वारकामेत्यवसुदेवोग्रसेनयोः पतित्वाचरणावस्रैर्न्यषिंचत्कृष्णविच्युतः १५ कथ
यामासनिधनंवृष्णीनांकृत्स्नशोनृप तच्छ्रुत्वोद्विग्नहृदयाःजनाःशोकविमूर्छिताः १६ तत्र
स्मत्वरिताजग्मुःकृष्णविश्लेषविह्वलाः व्यसवःशेरतेयत्रज्ञातयोघ्नतआननं १७ दे
वकीरोहिणीचैववसुदेवस्तथासुतौ कृष्णरामावपश्यन्तःशोकार्ताःविजहुःस्मृतिं १८
प्राणांश्चविजहुस्तत्रभगवद्विरहातुराः उपगुह्यपतींस्तातचितामारुरुहुःस्त्रियः १९ रा
मपत्न्यश्चतद्देहमुपगुह्याग्निमाविशन् वसुदेवपत्न्यस्तद्गात्रंप्रद्युम्नादीन्हरेःस्नुषाः २० कृ
ष्णपत्न्योविशन्नग्निंरुक्मिण्याद्यास्तदात्मिकाः वधूनांनहतानांत्वार्जुनःसांपरायिकं २१

योयेषुतैः नाहंप्रकाशःसर्वस्ययोगमायासमावृतः मूढोयंनाभिजानातिलोकोमामजमव्यय
मित्यादिभिः नष्टगोत्राणांनष्टसंततीनांसांपरायिकं पिंडोदकानि २१ ० १५१

 २२ २३ २४ आदितआरभ्यश्रीकृष्णचरितकीर्तनेयस्यफलमाह यएतदिति द्वाभ्यां २६ इत्थमिति परमहं
 सगतौ श्रीकृष्णपदं २७ एवमेकादशस्कंधपदभावार्थदीपिका स्वाज्ञानध्वांतभीतेनश्रीधरेणप्रका॥

दत्तानोकारयामासयथावदनुपूर्वशः द्वारकांहरिणात्यक्तांसमुद्रोप्लावयत्क्षणात २२ वर्जयि। ॥ समाप्तश्चायमेकादशस्कंधः ॥
त्वामहाभागश्रीमद्भगवदालय नित्यसन्निहितस्तत्रभगवान्मधुसूदनः २३ स्मृत्याशेषाशुभहरं
सर्वमंगलमंगलं स्त्रीबालवृद्धानादायहतशेषान्धनंजयः इंद्रप्रस्थंसमावेश्यवज्रंतत्राभ्यषेच
यत् २४ श्रुत्वासुहृद्वधंराजन्नर्जुनात्तेपितामहाः त्वांतुवंशधरंकृत्वाजग्मुःसर्वेमहापथं २५
यएतद्देवदेवस्यविष्णोःकर्माणिजन्मच कीर्तयेच्छ्रद्धयामर्त्यः सर्वपापैःप्रमुच्यते २६ इत्थं
हरेर्भगवतोरुचिरावतारवीर्याणिबालचरितानिचशंतमानि अन्यत्रचेहचश्रुतानिगृणन्म
नुष्योभक्तिंपरांपरमहंसगतौलभेत २७ इतिश्रीभागवतेमहापुराणएकादशस्कंधेएकत्रिंशो
ध्यायः ३१ यद्भुतजगदार्तिशोकशमनीयत्कर्मसत्कर्मभूर्यन्यादृष्टितकामधेनुरमलायद्वीरस
द्वीरिपुः यस्यानुस्मरणाभवापहरणायस्योदितंभूरितंविष्णोस्तुग्रहविग्रहःसभवतांभूयाच्छ्रियेपावहं दि
रिता ९ इतिश्रीभागवतेभावार्थदीपिकायांश्रीधरस्वामिविरचितायामेकादशस्कंधेएकत्रिंशोध्यायः १५२

11th Skand.